(567) "छिदिर् द्वैधीकरणे" (VII-रुधादिः-1440. सक. अनि. उभ.)

[1]छेदकः-दिका, छेदकः-दिका, [2]चिच्छित्सकः-त्सिका, [3]चेच्छिदकः-दिका ;
छेत्ता-त्री, छेदयिता-त्री, चिच्छित्सिता-त्री, चेच्छिदिता-त्री ;
[4]छिन्दन्-ती, छेदयन्-न्ती, चिच्छित्सन्-न्ती ; —
[5]छेत्स्यन्-न्ती-ती, छेदयिष्यन्-न्ती-ती, चिच्छित्सिष्यन्-न्ती-ती ; —
छिन्दानः, छेदयमानः, चिच्छित्समानः, चेच्छिद्यमानः ;
छेत्स्यमानः, छेदयिष्यमाणः, चिच्छित्सिष्यमाणः, चेच्छिदिष्यमाणः ;
[6]रज्जुच्छित्-रज्जुच्छिदौ-रज्जुच्छिदः, [A]शोकच्छित् ; —
[7]छिन्नम्[B]-छिन्नः-छिन्नवान्, छेदितः, चिच्छित्सितः, चेच्छिदितः-तवान् ;
[8]छिदः, [9]छिदुरः[C], [10]चिच्छिद्वान्, छेदः, चिच्छित्सुः, चेच्छिदः ;

---

1. 'पुगन्तलघूपधस्य च' (7-3-86) इत्युपधायाः गुणः । एवं णिचि परतोऽपि सर्वत्र ज्ञेयम् । तव्यदादिष्वपि गुणो यथासम्भवमेवमूह्यः ।
2. धातोरनुदात्तत्वात्, 'एकाच उपदेशेऽनुदात्तात्' (7-2-10) इत्यनेनेण्णिषेधः । अभ्यासस्य तुगागमः । उत्तरखण्डे दकारस्य चर्त्वम् । 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वान्न लघूपधगुणः । एवं सर्वत्र सनि बोध्यम् ।
3. 'दीर्घात्' (6-1-75) इति अभ्यासस्य तुगागमः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
4. 'रुधादिभ्यः—' (3-1-78) इति श्नम् विकरणप्रत्ययः । 'श्नसोरल्लोपः' (6-4-111) इत्यकारलोपः । एवं छिन्दानः इत्यत्रापि प्रक्रिया ज्ञेया ।
5. इडभावः, लघूपधगुणश्च । 'खरि च' (8-4-55) इति दकारस्य चर्त्वेन तकारः ।
6. 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (3-2-61) इति कर्मण्युपपदे क्विप् ।
7. 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठानत्वम् ।
8. 'इगुपधज्ञा—' (3-1-135) इति कर्तरि कः ।
9. 'विदिभिदिच्छिदेः कुरच्' (3-2-162) इति ताच्छीलिकः कुरच् प्रत्ययः । प्रत्ययस्य कित्त्वान्न गुणः ।
10. लिटः क्वसुः । द्विर्वचनम् । क्वसोः क्रादिनियमप्राप्त इडागमः, 'वस्वेकाजाद्घसाम्' (7-2-67) इति नियमान्न भवति ।

A. 'एष शोकच्छिदो वीरान् प्रभो सम्प्रति वानरान् ।' भ. का. 7-27.

B. 'रुन्धन् दिशो दिनमुखेऽथ जगन्ति भिन्दन्
प्रच्छिन्नसंशयमतिर्मुदमाशु रिञ्चन् ।' धा. का. 3-1.

C. 'पयोधरोत्सर्पिषु शीर्यमाणः संलक्ष्यते न छिदुरोऽपि हारः ॥'
रघुवंशे—16.62.